श्री आदित्य स्तवं

श्री आदित्य स्तवं

ब्रह्मोवाच |
नमस्ये यन्मयं सर्वमेतत्सर्वमयश्च यः |
विश्वमूर्तिः परंज्योतिर्यत्तद्ध्यायंति योगिनः || 1 ||

य ऋङ्मयो यो यजुषां निधानं
साम्नां च यो योनिरचिंत्यशक्तिः |
त्रयीमयः स्थूलतयार्धमात्रा
परस्वरूपो गुणपारयोग्यः || 2 ||

त्वां सर्वहेतुं परमं च वेद्य-
-माद्यं परं ज्योतिरवेद्यरूपं |
स्थूलं च देवात्मतया नमस्ये
भास्वन् तमाद्यं परमं परेभ्यः || 3 ||

सृष्टिं करोमि यदहं तवशक्तिराद्या
तत्प्रेरितो जलमहीपवनाग्निरूपां |
तद्देवतादिविषयां प्रणवाद्यशेषां
नात्मेच्छया स्थितिलयावपि तद्वदेव || 4 ||

वह्निस्त्वमेव जलशोषणतः पृथिव्याः
सृष्टिं करोषि जगतां च तथाद्य पाकं |
व्यापी त्वमेव भगवन् गगनस्वरूपं
त्वं पंचधा जगदिदं परिपासि विश्वं || 5 ||

यज्ञैर्यजंति परमात्मविदो भवंतं
विष्णुस्वरूपमखिलेष्टिमयं विवस्वन् |
ध्यायंति चापि यतयो नियतात्मचित्ताः
सर्वेश्वरं परममात्मविमुक्तिकामा || 6 ||

नमस्ते देवरूपाय यज्ञरूपाय ते नमः |
परब्रह्मस्वरूपाय चिंत्यमानाय योगिभिः || 7 ||

उपसंहर तेजो यत्तेजसः संहतिस्तव |
सृष्टेर्विधाताय विभो सृष्टौ चाऽहं समुद्यतः || 8 ||

मार्कंडेय उवाच |
इत्येवं संस्तुतो भास्वान् ब्रह्मणा सर्गकर्तृणा |
उपसंहृतवांस्तेजः परं स्वल्पमधारयत् || 9 ||

चकार च ततः सृष्टिं जगतः पद्मसंभवः |
तथा तेषु महाभागः पूर्वकल्पांतरेषु वै || 10 ||

देवासुरादीन्मर्त्यांश्च पश्वादीन्वृक्षवीरुधः |
ससर्ज पूर्ववद्ब्रह्मा नरकांश्च महामुने || 11 ||

इति श्रीमार्कंडेयपुराणे शततमोऽध्याये ब्रह्म कृत श्री आदित्य स्तवं |